शास्त्री-II साहित्य

रघुवंश महाकाव्यम् - त्रयोदश-चतुर्दशसर्गयोः

Date __/__ लघूत्तरीय प्रश्नोत्तराणि

प्र०(1) - केन प्रकारेण पुष्पकविमानस्य स्वमनोऽनुगामित्वं वर्णयामास श्रीरामः ?

उत्तरम् - श्रीरामः सीतामाह -

क्वचित्पथा सञ्चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥

प्र०(2) - केन श्लोकेन श्रीरामः पुष्पक विमानस्य देवमार्गगामित्वं वर्णयामास ?

उत्तरम् - असौ महेन्द्रद्विपदानगन्धिः त्रिमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थान् आचामति स्वेदलवान् मुखे ते ।

प्र०(3) - केन प्रकारेण लताः रामसीताऽपनयनमार्गं रामं सं सूचयामास ?

उत्तरम् - आवर्जित पल्लवाभिः शाखाभिः ।

प्र०(4) - मृग्यः केन प्रकारेण सीताऽपहरणमार्गं श्रीरामं सूचयामास ?

उत्तरम् - उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्याम् व्यापारयित्वा

प्र०(5) - माल्यवति पर्वते मेघगर्जनानि श्रुत्वा सीता विहीनो रामः केन प्रकारेण दिनानि अतिवाहितवान् ?

उत्तरम् - अतीव कष्टेन ।

Renu Devi
06/09/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

उपशास्त्री - II साहित्य - तृतीय - पत्रम्
किरातार्जुनीय महाकाव्यम्
प्रथमः सर्गः

Saathi

Date __/__/__

प्र०(1) - पद्य मिदम् व्याख्येयम् ।

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरः स्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु वर्हिषाम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - निरन्तरं मणिमयपीठेषु विराजमानौ यौ भवच्चरणौ प्रणमतां राज्ञां मौलिस्थमालातः प्रपतता परागेण निरन्तरमरञ्येताम् तावेव संप्रति मृगैस्तपस्विभिश्च छिन्न शिरःसु कुशकण्टकेषु तिष्ठतः । इयं ते दुर्दशा जातेत्यर्थः ।

व्याख्या:- अनारतं = निरन्तर । मणिपीठशायिनौ = रत्नजटित चौकीपर रहने वाले । यौ = जिन (तुम्हारे चरणों) की । राजशिरः स्रजां रजः = राजाओं के मस्तकपर की मालाओं का पराग । अरञ्जयत् = रंग देता था । तौ ते चरणौ = वे ही तुम्हारे चरण । मृगद्विजालूनशिखेषु = मृगों और ऋषियों द्वारा खूँटी गई शिखाओं वाले । वर्हिषां वनेषु = कुशाओं के वनों में । निषीदतः = रहते हैं ।

Renu Devi
06/09/20

राधा उमाकांत सं० महावि० सुरवसैना, पूर्णिया ।

Page No. ____

उपशास्त्री-I साहित्य - तृतीय - पत्रम
किरातार्जुनीय महाकाव्यम्
प्रथमः सर्गः

Date ___/___/___

प्र०(1)- पद्यमिदम् व्याख्येयम् ।

पुरोपनीतं नृप! रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥

उत्तरम्:- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति हे राजन! पूर्वं ब्राह्मणान् सादरं भोजयित्वा तदवशिष्टमन्नं भुक्तवतस्तव यत् शरीरं मनोहरमासीत् साम्प्रतं वन्यानि फलान्यश्नतस्ते तदेव शरीरं यथा क्षीणतामुपैति तथैव ते कीर्तिरपि क्षीयते ।

व्याख्या:- नृप = हे राजन! यत् एतत् = जो यह । (ते वपुः = तुम्हारा शरीर) पुरा = पहिले । द्विजातिशेषेण = ब्राह्मणों के खा लेने पर बचे हुए (उच्छिष्ट) । अन्धसा = अन्न से । रामणीयकं = मनोहरता को । उपनीतम् = प्राप्त होता था । अद्य = आज । वन्यफलाशिनः = जंगल के कन्द मूल - फलों का आहार करनेवाले । ते = तुम्हारा । तद्वपुः = वही शरीर । यशसा समं = कीर्ति के साथ । कार्श्यम् = कृशता को परैति = प्राप्त हो रहा है

Renu Devi,
06/09/20
राघव उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No. ____

शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम्

Date ___/___/___

प्र० (1) – अभिज्ञानशाकुन्तलं रूपकस्य कः भेदः ?
उत्तरम् – अभिज्ञानशाकुन्तलं रूपकस्य नाटकभेदः ।
प्र० (2) – अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?
उत्तरम् – अभिज्ञानशाकुन्तले सप्त अङ्काः सन्ति ।
प्र० (3) – स्रष्टुः आद्या सृष्टिः का ?
उत्तरम् – स्रष्टुः आद्या सृष्टिः जलरूपा ।
प्र० (4) – विधिहुतं हविः कः वहति ?
उत्तरम् – विधिहुतं हविः पावकः वहति ।
प्र० (5) – कया प्राणिनः प्राणवन्तः ?
उत्तरम् – वायुरूपया भगवतः मूर्त्या प्राणिनः प्राणवन्तः भवन्ति ।
प्र० (6) – का सर्वबीजप्रकृतिराहुः ?
उत्तरम् – पृथ्वीरूपा भगवतः तनुः सर्वबीजप्रकृतिराहुः ।
प्र० (7) – अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके किं छन्दः ?
उत्तरम् – अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके स्रग्धरा-छन्दः विज्ञेयम् ।
प्र० (8) कस्य दिवसाः परिणामरमणीयाः ?
उत्तरम् – ग्रीष्मसमयस्य दिवसा परिणाम रमणीयाः ।

Renu Devi
06/09/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।